1. Hafta

# दीपावलिः

भारतवर्षस्य उत्सवेषु दीपावल्याः उत्सवः  अतीव रम्यः।

उत्सवस्य विषये एका कथा प्रचलिता। जनाः कथयन्ति यत् पुरा रावणेन सह श्रीरामचन्द्रस्य युद्धम् अभवत्। तस्मिन् युद्धे श्रीरामचन्द्रः रावणम् अजयत्। सीतया लक्ष्मणेन च सह श्रीरामचन्द्रः अयोध्याम् प्रत्यागच्छत्। तदा अयोध्यायाः जनाः अतीव प्रसन्नाः अभवन्।

ते श्रीरामचन्द्रस्य विजयोत्सवे स्वानि गृहाणि दीपमालाभिः आलोकयन्। ततः प्रभृति प्रतिवर्षम् तस्मिन् एव दिने दीपावल्याः उत्सवः भवति।

दीपावल्याः दिवसे जनानां हृदयेषु महान् उल्लासः भवति। सर्वे जनाः गृहाणि भूषयन्ति। ते बालकेभ्यः प्रसन्नतया क्रीडनकानि मिष्टान्नानि च आनयन्ति। जनाः स्वमित्रेभ्यः मिष्टान्नानि प्रेषयन्ति। सन्ध्यायाम् जनाः असङ्ख्यानाम् दीपानाम् आवली रचयन्ति। रात्रौ जनाः लक्ष्मीं पूजयन्ति। अहो! रमणीय अयं प्रकाशोत्सव।